# ६२. पञ्चपरमेष्ठिनमस्कारकल्पः* ।

तथा पुण्यतमं मन्त्रं जगत्त्रितयपावनम् । योगी पञ्चपरमेष्ठिनमस्कारं विचिन्तयेत् ॥ १ ॥
अष्टपत्रे सिताम्भोजे कर्णिकायां कृतस्थितिम् । आद्यं सप्ताक्षरं मन्त्रं पवित्रं चिन्तयेद्बुधः ॥ २ ॥
सिद्धादिकचतुष्कं च दिक्पत्रेषु यथाक्रमम् । चूलापदचतुष्कं च विदिक्पत्रेषु चिन्तयेत् ॥ ३ ॥
त्रिशुद्ध्या चिन्तयन्नस्य शतमष्टोत्तरं मुनिः । भुञ्जानोऽपि स लभते चतुर्थतपसः फलम् ॥ ४ ॥
एतमेव महामन्त्रं समाराध्येह योगिनः । त्रिलोक्याऽपि महीयन्तेऽधिगताः परमं पदम् ॥ ५ ॥
कृत्वा पापसहस्राणि हत्वा जन्तुशतानि च । अमुं मन्त्रं समाराध्य तिर्यञ्चोऽपि दिवं गताः ॥ ६ ॥
गुरुपञ्चकनामोत्था विद्या स्यात् षोडशाक्षरा । जपन् शतद्वयं तस्याश्चतुर्थस्याप्नुयात् फलम् ॥ ७ ॥

॥ इति श्रीपञ्चपरमेष्ठिनमस्कारकल्पः ॥

---

1 Pa °मित्त° नास्ति । 2 Pa चय° । 3 A P °कुल° नास्ति । 4 P °तत्तणयाइं । 5 A अंबया° । 6 Pa देवी इह । 7 P भुवणे । 8 A Pa देव° । 9 Pa वागुब्भं चिंति° । 10 A नमो । 11 B P नास्ति 'पररक्खा' ।

*चतुरशीतिमहातीर्थनामसङ्ग्रहकल्पानन्तरम् P सञ्ज्ञके आदर्शे एष कल्पो लिखितो लभ्यते । अन्यसर्वादर्शेष्वनुपलम्भादत्र ग्रन्थान्तेऽस्माभिरयं स्थापितः ।